तम् । प्रशस्तं कथितं नारी ! निषिद्धञ्च निशामय । वन्यहत्या निषिद्धस्य शिविरे नगरेऽपि च । वटो निषिद्धः शिविरे नित्यं चौरभयं ततः । नगरेषु प्रसिद्धस्य दर्शनात् पुण्यदस्तथा । हे नारी ! तिन्तिडीवृक्षो यत्नात्तं परिवर्ज्जय । शरेण धनहानिः स्यात् प्रजाहानिर्भवेत् ध्रुवम् । शिविरेऽतिनिषिद्धस्य नगरे किञ्चिदेव च । न निषिद्धः प्रसिद्धस्य ग्रामेषु नगरेषु च । वृक्षस्य चणकादीनां धान्यञ्च मङ्गलप्रदम् । ग्रामेषु नगरे चापि शिविरे च तथैव । इक्षुवृक्षस्य शुभदः सन्ततं शुभदस्तथा । कूष्माण्डस्य शिरीषस्य कदम्बस्य शुभप्रदाः ।। कच्ची हरिद्रा शुभदा शुभदश्चार्द्रकस्तथा । हरीतकी च शुभदा ग्रामेषु नगरेषु च । न वार्त्ताकी भद्रदा नित्यं तथा चामलकी ध्रुवम् । गजानामश्विनां शुभदमश्वानाञ्च तथैव च । कल्याणमुष्ट्रैःश्वस्यां वाणौ स्थापनकारिणाम् । न शुभप्रदमन्येषामुच्छन्नकारणं परम् । वानराणां नराणाञ्च गर्दभानां गवामपि । कुक्कुराणां शृगालानां मार्ज्जाराणामभद्रकम् । मेटकानां शूकराणां सर्वेषाञ्च शुभप्रदम् । ईशाने चापि पूर्वस्मिन् पश्चिमे च तथोत्तरे । शिविरस्य जलं भद्रमन्यत्राशुभमेव च । दीर्घं प्रस्थे समानञ्च न कुर्य्यान्मन्दिरं बुधः । चतुरस्रे गृहे नारी ! गृहिणां धननाशनम् । दीर्घप्रस्थः परिमितो नेताङ्कनापि संहृतः । शून्येन रहितं भद्रं शून्यं शून्यप्रदं नृणाम् । प्रस्थे हस्तद्वयात् पूर्वं दीर्घं हस्तत्रयं तथा । गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च । न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिके शुभम् । चतुरस्रं चन्द्रवेधं शिविरं मङ्गलप्रदम् । अभद्रं सूर्य्यवेधञ्च प्राङ्गणञ्च तथैव च । शिविराभ्यन्तरे भद्रा स्थापिता तुलसी नृणाम् । धनपुत्रप्रदात्री च पुण्यदा हरिभक्तिदा । प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत् । मालती यूथिका कुन्दो माधवी केतकी तथा । नागेश्वरं मल्लिका च काञ्चनं बकुलं शुभम् । अपराजिता च शुभदा तेषामुद्यानमीप्सितम् । पूर्वे च दक्षिणे चैव शुभदं नात्र संशयः । ऊर्द्धं षोडशहस्तेभ्यो नैवं कुर्य्याद् गृहं गृही । ऊर्द्धं विंशतिहस्तेभ्यः प्राकारं न शुभप्रदम् । सूत्रधारं तैलकारं स्वर्णकारञ्च हीरकम् । वाटीमूले ग्राममध्ये न कुर्य्यात् स्थापितं बुधः । ब्राह्मणं क्षत्रियं वैश्यं सच्छूद्रं गणकं शुभम् । भट्टं वैद्यं पुष्पकारं स्थापयेत् शिविरान्तिके ! प्रस्थे च परिखामानं शतहस्तं प्रशस्तकम् । परितः शिविराणाञ्च गम्भीरं दशहस्तकम् । सङ्केतपूर्वकञ्चैव परिखाद्वारमीप्सितम् । शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च । शाल्मलीनां तिन्तिडीनां छिन्नानां तथैव च । निम्बानां सिन्धुवाराणां उडुम्बराणामभद्रकम् । धुस्तूराणां वटानाञ्चाप्येरण्डानामवाञ्छितम् । एतेषामतिरिक्तानां शिविरे काष्ठमीप्सितम् । वृक्षञ्च वज्रहतकं दूरतो वर्जयेद् बुधः । पुत्रदारधनं हन्यादित्याह कमलोद्भवः” ब्रह्मवै० ख० १०२ अ० ।

**शिविष्ट** पु० इत० । १वकवृक्षे २दूर्वायां स्त्री राजनि० । ३महादेवप्रिये त्रि० । [याप्ययाने हारा० ।

**शिवीरथ** शिवेर्भूर्जवृक्षस्य ईः शोभा यत्र तादृशो रथः ।

**शिशिर** न० शश–किरच् नि० । १हिमे माघफाल्गुनमासद्वयात्मके २ऋतुभेदे अमरः । तत्र ऋतौ वर्ण्यादिकन्तु नि “करीषः धूमः कुन्दः पद्मदाहः शिशिरोत्कर्षः” कविक० ल० ३शीतले स्पर्शे च न० ४तद्वति त्रि० अमरः । [च ।

**शिशु** पु० शो–कु सन्वद्भावः द्वित्वम् । १बालके अमरः २स्कन्दे

**शिशुक** पुंस्त्री० शिशुरिव इवार्थे कन् । १जलजन्तुभेदे (शुशुक) राजनि० स्त्रियां ङीष् । २बालके मेदि० ३वृक्षभेदे हेमच० “जातमात्रः शिशुस्तावत् यावदष्टौ समा वयः । स हि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शकः । भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथाऽनृते । तस्मिन् काले न दोषः स्यात् स यावन्नोपनीयते” मनुः । [शब्दमा० ।

**शिशुगन्धा** स्त्री शिशुः स्वल्पो गन्धो यस्याः । मल्लिकाभेदे

**शिशुचान्द्रायण** न० “चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः । चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम्” मनूक्ते व्रते । [तास्यत्र स्त्री ।

**शिशुत्व** न० इत० । शिशोर्भावः त्व । बाल्ये तल् । शिशु-

**शिशुपाल** पु० चेदिदेशीयराजभेदे दमघोषात्मजे त्रिका० ।

**शिशुपालहन्** पु० शिशुपालं हतवान् हन–भूते क्विप् । श्रीकृष्णे हेमच० ।

**शिशुमार** पुंस्त्री० शिशुं मारयति मृ–णिच् । १जलजन्तुभेदे अमरः स्त्रियां ङीष् । गगनस्थे २ताराचक्रभेदे च “शिशुमारस्तु यः प्रोक्तः स ध्रुवो यत्र तिष्ठति । सन्निवेशञ्च तस्यापि शृणुष्व मुनिसत्तम ! । यदह्ना कुरुते पापं दृष्ट्वा तन्निशि मुच्यते । तावत्यस्यैव तारास्ताः शिशुमाराश्रिता दिवि । तावन्त्येव तु वर्षाणि जीवत्यभ्यधिकानि तु । उत्तानपादस्तस्याथ विज्ञेयोऽप्युत्तरो हनुः । यज्ञो-